# Medhavikritam Mrityunjaya Stotram

# मेधावीकृतं मृत्युञ्जयस्तोत्रम्

## Document Information

Text title : Medhavikritam Mrityunjaya Stotram

File name : mRRityunjayastotrammedhAvIkRRitaM.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 16 | 181.2-199||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# मेधावीकृतं मृत्युञ्जयस्तोत्रम्

मेधावी उवाच -
ॐ नमः शम्भवे नित्यं मृत्युञ्जय नमोऽस्तु ते ॥ १८१।२॥

ॐ नमः पार्वतीनाथ शरणागतवत्सल ।
ॐ नमो विश्वरूपाय ॐ नमोऽनन्तमूर्तये ॥ १८२॥

ॐ नमो रूपहीनाय नानारूपाय ते नमः ।
ॐ नमो निष्कलेशाय ॐ नमो निर्गुणाय ते ॥ १८३॥

ॐ नमो निर्विकाराय शान्ताकाराय ते नमः ।
ॐ नमो निष्प्रपञ्चाय नमः श्रुत्यात्मकाय ते ॥ १८४॥

ॐ नमः कालरूपाय कालातीताय ते नमः ।
ॐ नमः श्रीमहेशाय सर्वाधाराय ते नमः ॥ १८५॥

ॐ नमः पुण्यरूपाय पुण्यातीताय ते नमः ॥

ॐ नमो भूस्वरूपाय ॐ नमोऽम्बुस्वरूपिणे ॥ १८६॥

ॐ नमोऽग्निस्वरूपायः ॐ नमो वायुमूर्तये ।
ॐ नमोः व्योमरूपाय दिव्यरूपाय ते नमः ॥ १८७॥

ॐ नमः कालरूपाय यज्वरूपाय ते नमः ।
ॐ नमो आनुरूपाय चन्द्ररूपाय ते नमः ॥ १८८॥

ॐ नमः सर्वरूपाय शरण्याय नमो नमः ॥ १८९॥

(नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
इत्यादि त वो जम्भे दधामीति पर्यन्त नमकं पठित्वा पुनः स्तोत्रम्)
प्रणतोऽस्मि महादेव प्रपन्नोऽस्मि सदाशिव ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९०॥

कालकूटधर श्रीमन्कालकाल कृपानिधे ।

निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९१॥

चन्द्रशेखर विश्वात्मन्करुणाकर शङ्कर ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९२॥

ऋग्यजुःसामरूपेश त्रिलोचन सुरोत्तम ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९३॥

अनन्तामेयकल्याण कल्याणगुणसंश्रय ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९४॥

सुरेश्वर सुराराध्य निर्दग्धत्रिपुरासुर ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९५॥

पाशाङ्कुशधर श्रीमन्नमो डमरुभूषण ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९६॥

भस्मोद्धूलितसर्वाङ्ग हर निर्धूतकल्मष ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९७॥

प्रदर्शय महाशूलं कल्पक्षयकरं हर ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९८॥

भुजङ्गभूषण श्रीमन्वृषभध्वज विश्वग ।
निवारय महामृत्युं मृत्युञ्जय नमोऽस्तु ते ॥ १९९॥

॥ इति शिवरहस्यान्तर्गते मेधावीकृतं मृत्युञ्जयस्तोत्रं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् उग्राख्यः सप्तमांशः । अध्यायः १६ । १८१।२-१९९॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 16 . 181.2-199 ..

Encoded and proofread by Ruma Dewan

*Medhavikritam Mrityunjaya Stotram*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*